# संस्कृतवार्ता:

दिनाङ्क :- 15/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- केन्द्रीय-गृहमन्त्री-अमितशाहः अद्य असमस्थ गोलाघाट जनपदस्य डेरग्रामे अत्याधुनिक – लचित – बरफुकन - आरक्ष्याकादम्याः उद्घाटनम् एवं आवासीय - परियोजनानाम् आधारशिलाम् अस्थापयत्।
- भारतीयान्तरिक्षानुसन्धानसङ्घटनेन तमिलनाडोः महेन्द्रगिरिक्षेत्रे एल-वी-एम्- तृतीयप्रक्षेपण-यानस्य षष्ठाभियानार्थं क्रायोजेनिक-यन्त्रस्य उड्डयनानुकूल-तापपरीक्षणं साफल्यपूर्वकं सम्पादितम्।
- आगामिवर्षाय षड्विंशत्यधिक द्विसहस्रतम-वर्षस्य गणतन्त्रदिवसाय पद्मपुरस्कारस्य नामाङ्कनं अद्य उद्घाटितम्। नामाङ्कनस्य अन्तिमतिथिः जुलाईमासस्य एकत्रिंशत्दिनाङ्कम् यावदस्ति।
- पाकिस्ताने बलूचिस्तानमुक्तिसेनया जफ्फर-एक्स्प्रेस् यात्रीरेलयानापहरण घटनायाः समये गृहीतेभ्यः सर्वेभ्यः चतुर्दशाधिकद्विशत- पाकिस्तानीसैन्यबन्धकेभ्यः मृत्युदण्डं प्रदत्तम्।
- महिलाप्रीमियरलीग इत्यस्यां क्रिकेट्-क्रीडायाम् अद्य सायं मुम्बई-नगरस्य ब्रेबोर्न्- क्रीडाङ्गणे दिल्ली-कैपिटल्स्-दलं मुम्बई-इण्डियन्स्-दलं निर्णायकद्वन्द्वे सम्मुखीकरीष्यति।

---------------------------------------

अमितशाह-असम

केन्द्रीय-गृहमन्त्री-अमितशाहः अद्य असमस्थ गोलाघाट जनपदस्य डेरग्रामे अत्याधुनिक – लचित – बरफुकन - आरक्ष्याकादम्याः उद्घाटनम् अकरोत्। अत्रावसरे सः आरक्ष्याकादम्याः आवासीय - परियोजनानामपि आधारशिलाम् अस्थापयत्। एतस्मिन्नुपक्रमे तेन प्रोक्तं यत् आगामिषु पञ्चवर्षेषु इयं आरक्ष्याकादमी भारतस्य सर्वश्रेष्ठाकादमी भविष्यति। गृहमन्त्रिणा प्रोदीरितं यत् असमराज्यं जवीयगत्या विकासयात्रां कुर्वदस्ति सहैव प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे राज्ये शान्तिस्थापनमपि समभवत् ।

श्रीशाहेन विज्ञापितं यत् केन्द्रं राज्याय त्रिलक्षकोटिरुप्यकाणां परियोजनाः प्रदास्यति येन क्षेत्रे आधारभूत-संरचनाः समेधिष्यन्ते।

श्री शाहेन प्रोक्तं यत् प्रधानमन्त्री-मोदिनः प्रयासकारणादेव राज्यस्य सर्वैरपि उग्रवादि सङ्घटनैः शान्तिवार्तायां

भागं स्वीकृतम् तथैव बहुभिः सङ्घटनैश्च समर्पणञ्चापि विहितम्। अत्रावसरे असमस्य मुख्यमन्त्री हेमन्त-बिस्वा-सरमा इत्येषः प्रोक्तवान् यदद्य असमारक्षिदलाय कश्चन महत्त्वपूर्णदिवसः वर्तते। सहैव महानायकाय लचित-बरफुकनवर्याय अयं भावमय-श्रद्धाञ्जलिः अपि वर्तते। मुख्यमन्त्रिणा प्रोक्तं यत् राज्यसर्वकारः अस्मिन्नेव परिसरे आरक्षि-चिकित्सकीय-शैक्षणिक-संस्थानस्य उद्घाटनार्थं योजनां संकल्पयति। श्रीसरमा इत्यमुना अग्रे कथितं यत् राज्ये विधिव्यवस्थायाः स्थितिः विगतदशकापेक्षया अत्युत्तमा वर्तते। एवमेव अपराधकृत्येष्वपि पञ्चाशत्प्रतिशतमितं यावत् अपचितिः दृश्यते। केन्द्रीय-जलमार्गमन्त्री सर्बानन्द सोनोवालः प्रोक्तवान् यत् अत्याधुनिक-आरक्ष्यकादमी नवीनयुगस्य अपराधान् सम्मुखीकर्तुं देशे सर्वश्रेष्ठारक्षिदलस्य निर्माणं विधास्यति। अत्रावसरे विदेश-राज्यमन्त्री पबित्रा मार्गेरिटा एवं अन्ये गणमान्याश्चापि उपस्थिताःआसन् ।

---

इसरो- LVM3 उड्डयनस्वीकृतिः

भारतीयान्तरिक्षानुसन्धानसङ्घटनेन तमिलनाडोः महेन्द्रगिरिक्षेत्रे एल-वी-एम्-तृतीयप्रक्षेपण-यानस्य षष्ठाभियानार्थं क्रायोजेनिक-यन्त्रस्य उड्डयनानुकूल-तापपरीक्षणं साफल्यपूर्वकं सम्पादितम्। इसरो इत्यनेन विज्ञापितं यत् प्रत्येकाभियाने क्रायोजेनिक-यन्त्रस्य उड्डयनात् पूर्वं तापपरीक्षणं भवति।

---------------------------------------

पद्मपुरस्कारः

आगामिवर्षाय षड्विंशत्यधिक द्विसहस्रतम-वर्षस्य गणतन्त्रदिवसाय पद्मपुरस्कारस्य नामाङ्कनं अद्य उद्घाटितम्। नामाङ्कनस्य अन्तिमतिथिः जुलाईमासस्य एकत्रिंशत्दिनाङ्कम् यावदस्ति। नामाङ्कनं अनुशंसा च केवलं राष्ट्रीयपुरस्कारपोर्टलमाध्यमेनैव स्वीक्रियन्ते। पद्मपुरस्कारेषु पद्मविभूषणं, पद्मभूषणं, पद्मश्रीः च भारतस्य सर्वोच्चनागरिकसम्मानेषु अन्यतमानि सन्ति, येषु कला, साहित्यं, शिक्षा, क्रीडा, चिकित्सा, सामाजिककार्यम्, विज्ञानम्, जनकार्याणि, सिविलसेवाः, उद्योगेत्यादिषु क्षेत्रेषु असाधारणोपलब्धिनां मान्यता भवति। सर्वकारीयकर्मचारिणं, पीएसयू-कर्मचारिणं च विहाय, जातिव्यवसायलिङ्गाधारेण यः कोऽपि एतदर्थं पात्रताम् आसादयति।

---------------------------------------

पाक-बन्धकानाम्-हत्याः

पाकिस्ताने बलूचिस्तानमुक्तिसेनया जफ्फर - एक्स्प्रेस् यात्रीरेलयानापहरण घटनायाः समये गृहीतेभ्यः सर्वेभ्यः चतुर्दशाधिकद्विशत- पाकिस्तानीसैन्यबन्धकेभ्यः मृत्युदण्डं प्रदत्तम्। विद्रोहीसङ्घटनस्य प्रवक्त्रा जियन्दबलोच् इत्यनेन उक्तं यत् पाकिस्तानीसैनिकाः बन्धकानां आदानप्रदानार्थं प्रदत्तसमये अष्टचत्वारिंशत्होरासु प्रतिक्रियां दातुं असफलाः अभवन्, येन सामूहिकमृत्युः अभवत्। विद्रोहिसङ्घटनेन उक्तं यत्ते सर्वदा अन्ताराष्ट्रियविध्यनुसारं कार्यं कृतवन्तः, परन्तु पाकिस्तानस्य दुराग्रहेण ते एवं विधातुं बाधिताः । बीएलए इत्यनेन एतदपि कथितं यत् तेषां योद्धारः फिदायीन् इति नामाभिधेयाः मृत्युं यावत् युद्धं कृतवन्तः। अन्ततो गत्वा बन्धकान् हत्वा पाकिस्तानीसैनिकैस्सह युध्यमानाः सन्तः ते स्वीयप्राणान् विसर्जितवन्तः।

------------------------------------------

## मराठीभाषा

एम.पी.एस.सी. इति महाराष्ट्रलोकसेवायोगेन संचालिताः सर्वाः प्रतियोगिपरीक्षाः मराठीभाषायामपि आयोजयिष्यन्ते। शिवसेना- उधवबालासाहेब-ठाकरे-पार्टीति दलस्य विधायकेन मिलिन्द नरवेकर इत्यनेन उत्थापितस्य प्रश्नस्य प्रत्युत्तररुपेण मुख्यमन्त्रिणा देवेन्द्र-फडणवीस इत्यमुना अद्यैव राज्यविधानपरिषदि इदं घोषितम्। मुख्यमन्त्रिणा उक्तं यत् मराठीभाषायाम् आङ्ग्लभाषायाञ्च प्राविधिकभाषापरीक्षाः पूर्वमेव क्रियन्ते। पाठ्यपुस्तकानि सम्प्रति अनुपलब्धानि सन्ति चेदपि नूतनशिक्षानीत्यां मराठीभाषायां अभियान्त्रिकीपाठ्यक्रमस्य सञ्चालनं कर्तुं शक्यते। एमपीएससी इत्यनेन सह संरचिता समयरेखा निर्धारिता भविष्यति, एताः परीक्षाः मराठीभाषायाम् अपि क्रियन्ते। एतेन मराठीभाषिणां छात्राणां साहाय्यं भविष्यति ये आङ्ग्लभाषायां संचालितपरीक्षासु संघर्षं कुर्वन्ति इति।

------------------------------------------

## प्रधानमन्त्री-मन की बात

प्रधानमन्त्री नरेन्द्रमोदी मार्चमासस्य त्रिंशद्दिनाङ्के आकाशवाण्याः मन की बात इति कार्यक्रमे देशविदेशस्थ-जनैस्सह विचार-विनिमयीकरिष्यति। इदं मासिकरेडियोकार्यक्रमस्य विंशत्यधिकैकशततमं संस्करणं भविष्यति । जनाः नमो एप् इति चलदूरभाषीयतन्त्रांशे MyGov Open Forum इत्यत्र अथ च 1800-11-7800 अस्यां दूरभाषसंख्या-माध्यमेन च कार्यक्रमस्य विषये स्वीयप्रतिक्रियां दातुं शक्नुवन्ति। आगामिसंस्करणाय परामर्शाः अस्य मासस्य अष्टाविंशति-दिनाङ्कपर्यन्तं स्वीकृताः भविष्यन्ति।

------------------------------------------

## महिलाप्रीमियरलीग

महिलाप्रीमियरलीग इत्यस्यां क्रिकेट्-क्रीडायाम् अद्य सायं मुम्बई-नगरस्य ब्रेबोर्न्-क्रीडाङ्गणे दिल्ली-कैपिटल्स्-दलं मुम्बई-इण्डियन्स्-दलं निर्णायकद्वन्द्वे सम्मुखीकरीष्यति। स्पर्धायाः प्रसारणं सायं अष्टवादनात् समारप्स्यते।

----------------------------------------

<u>संस्कृत-साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः श्वः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ताः।।